# स्थल कमल बन्धः

वन्दे नतसुरव्रातपालं कुलपतिं गुरुं ।
रणोत्कमत्तघं रामं नरपालं गुणोत्तमम् ॥ 86 ॥

वन्देति । स्पष्टोर्थः

[ उत्कः - उत्कण्ठितः - स्यादुत्क उन्मनाः इत्यमरः उत्तघं - भक्षित अघं - नाशित अघं इत्यर्थः अस्मिन् श्लोके गूढचतर्थं अपि द्रष्टव्यं - तदपि बहिरष्टळेषु क्रमेण चतुर्थ पादोद्धारः मिलति । (स्थलकमलं - Rose Flower) PKS]



# दशमं सङ्कीर्ण बन्ध प्रकरणम्

## ऊर्ध्व पुण्ड्र बन्धः

पारावारसुता पायात् पापाकूपारपातिनम् ।

पालितानवमारामाऽमारामावनतालिपा ॥ 87 ॥

पारावारेति । पालितनवमा-अनवमाः - ज्ञानोत्कृष्टाः पालिताः यया सः ।

अमारा मृत्युरहिताः सर्वविकारेत्यर्थः । अवनतानां - प्रपन्नानां आलिं पङ्क्तिं पातीति तथोक्ता । रामा- भगवत इति शेषः । मा-लक्ष्मीः । शिष्टं स्पष्टम् । मा रोना मरणे कामे इति नानार्थ रत्नमाला ।




## घण्टा बन्धः

देव तव स्तवरचनं मोदशद त्रिदशदुर्लभं राम ।

मम तव सरोजपादे देहि रतिं वरद खण्डितासत्य ॥ 88 ॥

देवेति । पूर्वार्धं खड्गबन्धे व्याख्यातं । सरोजपादे - पद्मतुल्य पदयुगळे मम रतिं देहि । मां त्वच्चरकमल- सक्त हृदयं कुरु । शिष्टं स्पष्टम् । (देव ! राम ! खण्डि असत्य ! मोद ! शद ! मुदं-सन्तोषं, शं-सुखं च ददातीति मोद शद ! तव स्तवरचनं त्रिदशदुर्लभं- ब्रह्म रुद्रादि देवैः अपि न शक्यं - इति)






# करक बन्धः

माता स्मरस्याखिलदेवधीरा नारायणोरस्थल वासकामा ।

माऽकारणामन्ददया धुतामावन्दारुमन्दार धुरन्धराव्यात् ॥

मातेति । अखिल देव धीरा-अखिलदेवापेक्षयापि धीरा-धैर्यशालिनी । अनेकजन्यानुभाव्य पापवतामपि मे रक्षणं कल्यातितिभावः । अकारणा अवतार रक्षणादिषु स्वकृपा व्यतिरिक्त कारणान्तर रहितेत्यर्थः । धुतामा (धुत आमा) विध्वस्ताश्रितविद्या । शिष्टं स्पष्टम् ।




This has been scored out by the Poet in the manuscript note book and sloka not numbered.

# पुष्पहार बन्धः



पारावाराधिराट् भूस्सुरवरहर शक्रादिमादित्यदिक् -

पैध्यार्ता पूतानतानां वरसुर धरणीरुट् दरोदर्यदण्डा ।

कामांबामारमा श्रीसखनखमुख संगाद रादभ्युदञ्चत् कोका -

स्तोकाञ्जिकारिस्तनघन विनताब्यादघादत्यदक्षम् ॥ 89 ॥

पारावारेति । नतानां सुखरधरणीरुट् अश्रित कल्पवृक्षः । दरोदरी अल्पोदरी। अदण्डा-पतिरिव न दण्डधरा । क्रूर-पापानपि भक्तान् न शिक्षयतीति अर्थः । श्रीत्यादि-श्रीसखस्य भगवतः नख-मुख संगादरात् संभोग काले दिव्य पाणिनख क्षतात् अभ्युदञ्चत् तौ विवृत्तौ-कोकेन-चक्रवाकेन अस्तोकाञ्जिकारिणौ तत्तुल्यावित्यर्थः । तादृक्भां स्तनाभ्यां घना-सान्द्रा-अत एव विनता विशेषेण नम्रा । शिष्टं स्पष्टं । मा-लक्ष्मीः अत्यदक्षं - अत्यन्तं असममित्यर्थः । अकिञ्चनं अनन्यगतिं च मां - अघात् - पापात् अव्यात् ।

## पुरुष बन्धः

पद्मनाभ भनाथास्य भगवन् रक्ष मानघ ।
घनमाक्षर भोयान कळभाशु शुभाळक ॥ 90 ॥

पद्मनाभेति । घनमा-सान्द्र मा-धीः यस्य तथा भूत, सर्वज्ञत्यर्थः ।

अक्षर-नित्य ! यानकळभ-गमन-विषये गजाभिन्न, गजगमनतुल्य गमनेति भावः । शुभाळक - भो भगवन् मा-मां आशु रक्ष । शिष्टं स्पष्टम् ।




## नारी बन्धः

पद्मनाभ भनाथास्य भगवन् पाहि मानघ ।
घनमाहिश भोयान कळभाशु शुभाळक ॥ 91 ॥

पद्मनाभेति । घनमा-सर्वज्ञ !

अहौ शेत इत्यहिश- शेषशयिन् इत्यर्थः ।

शिष्टं स्पष्टम् ।



# हंस बन्धः




तव हंसपते पक्षौ दक्षौ जलजमानस ।

पाण्डराराण्डपाजस्य वाह देवगणस्तुत ॥ 92 ॥

तवेति । हंस बन्ध श्लोकत्वात् चातुर्यात् तत् विषयक एवायं श्लोकः कृतः । जलजमानस-पद्मप्रिय ! देवगणस्तुत ! पाण्डर-शुभ्र शरीर ! अर-शीघ्रगामिन् ! अण्डपाजस्य अण्डातिपति चतुर्मुखस्य वाह-वाहनभूत हे हंसपते ! तव पक्षौ दक्षौ-गमन इत्यर्थः । अत एव अरेति साभिप्राय विशेषणं बोध्यम् । अरन्तु शीघ्रे चक्रकाङ्गे शीघ्रगामिनि तु त्रिष्विवि नानार्थ रत्नमाला ।

# मयूर बन्धः




ददमोदम मन्दंमे नमे जलजलोचन ।

शरणं घोरशमन प्राचाममदमो दद ।। 93 ।।

ददेति । हे जलज लोचन ! पुण्डरीकाक्ष ! घोराशमन ! क्रूर राक्षसादि नाशक ! प्राचां - तव भक्तानामिति शेषः । अमदमो दद मदाभावं मोदञ्च ददातीति तथोक्तं । मे-मम न शरणं त्वां विना रक्षकान्तरन्नास्ति । अतः अमन्दं मोदं दद-मह्यं मोक्षं देहीत्यर्थः ।

# मुरज बन्धः

असुरादिपराक्षयश्री सुराद्याजराक्षय ।

यक्षराजपरामर्ष रक्ष रादिपराम मां ।। 94 ।।

असुरेति । असुरादीनां पा-शत्रो । अक्षयश्री-नित्या-श्रीः सा हि श्रीरम्यता सतां इत्युक्त ज्ञानं येषां तेषां - सुराणां नित्यसूरिणामित्यर्थः । आद्या-अजर अक्षय-जराक्षय रहित । जर, क्षय शब्दस्सर्वविकारोपलक्षणार्थः । यक्षराजपरामर्ष - यक्षराजस्य - कुबेरस्य परः - शत्रुः रावणः तस्मिन् अमर्षः यस्य (सः) रादिपं - रादिभ्यो भयादिभ्यः पातीति तथोक्तं । एवं भूत राम मां रक्ष । रं क्लीबे रुधिरे ध्यानव्योमाण्ड कुक्षिषु मूर्ध्नि । वक्त्रे भये तु इति नानार्थ रत्नमाला । आश्रित भयनाशकः इत्यर्थः ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| अ | सु | रा | दि | प | रा | क्ष | य |
| श्री | सु | रा | द्या | ज | रा | क्ष | य |
| य | क्ष | रा | ज | प | रा | म | र्ष |
| र | क्ष | रा | दि | प | रा | म | मां |

Regular Way




Second Way










Third Way